ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

श्रीत्यागॅराजमखिकृत

श्रीत्यागेश महारथोत्सववर्णनपरश्लोकाः



CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

ed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja



தர்ம பத்தினியார் ஸ்ரீமதி சுந்தரி அம்மாளுடன்
ஸ்ரீ மன்னார்குடி பெரியவாள் என்கிற
மஹாமஹோபாத்யாய ப்ரும்மஸ்ரீ ராஜு ஸாஸ்திரிகள்

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

श्रीत्यागराजमखिकृत

श्रीत्यागेश महारथोत्सववर्णनपरश्लोकाः

With English and Tamil translation by

DR. GODA VENKATESWARA SASTRY

Published by

MANNARGUDI PERIYAVA SEVA SAMITI

Gurukripa, 6, 77th Street, 16th Avenue,
Ashok Nagar, Chennai 600 083.
Phone : 2489 2132

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

Sri Gurubyo Namah

मरकतवल्ली सहचरममरतरुं कमपि सुलभमानमताम्।
मार्गसहायामिलव कुलदेवतमाश्रयामि सुरमुख्यम्।

தெய்வங்களுள் உத்க்ருஷ்டமானவரும் மார்கஸஹாயரென்று அழைக்கப்படுபவரும், எப்பொழுதும் மரகதவல்லி என்ற பச்சைக்கொடியுடன் (தேவியுடன்) இணைந்த தேவலோகத்து விருஷமாக இருந்தும் தன்னை வணங்குபவருக்கு ஸௌலப்பமாக எவர் கிட்டுகிறாரோ அப்படிப்பட்ட எந்தன் முன்னோர்கள் வழிபட்ட குலதெய்வத்தை அடைக்கலம் புகுகிறேன். (மன்னார்குடி பெரியவா இயற்றியது.)

MANNARGUDI PERIAVA SEVA SAMITHI

With the blessings of Sri Sri Sri Jayendra Saraswathi Swamigal and Sri Sri Sri Sankara Vijeyendra Saraswathi Swamigal of Kanchi Kamakoti Peetam, the organization **Mannargudi Periava Seva Samithi,** was formed in the year 2009, by the descendents of Mannargudi Periava to celebrate his Jayanthi, year after year and to publish all the works written by him.

In the current year, on the occasion of the 195th Jayanthi Celebrations of Mannargudi Periava (to be held on 2nd June 2010), the first book in the series **Rathosthava Pancharathnam** is being released, along with the text of Arthanareeswara ashtakam.

The Samithi thanks Adayapalam Shri Ramakrishna Dikshithar, for his valued support, from the inception of the Samithi in all its activities and also for his foreword for this work. The Samithi also thanks Shri Goda Venkateswara Sastrigal for his trans-lation into English and Tamil, of this Sanskrit work Rathosthava Pancharathnam.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

☎ :044-27222115
Fax: 044 -27224305, 37290060
Email: skmkancl@md3.vsnl.net.in.

ஓ

ll Sri Chandramouleeswaraya Namaha: ||
Sri Sankara Bhaghavadpadacharya Paramparagatha Moolamnaya Sarvagnapeeta :
His Holiness Sri Kanchi Kamakoti Peetadhipathi

JAGADGURU SRI SANKARACHARYA SWAMIGAL

Srimatam Samsthanam
No. 1, Salai Street, KANCHIPURAM - 631 502.

19. 5. 2010

शास्त्रवार्धिपारदृश्वनां कृतिं महोज्ज्वलां चम्पकाटवीमहात्मनां सुपुण्यरूपिणाम्।
स्यन्दनोत्सवस्य कीर्तिधायिनीं वितन्वतांचन्द्रमौलिवीक्षणात्सदास्तु मङ्गलं नृणाम्।।

பரமேச்வரனின் அம்சாவதாரமாகத் சுமார் 500 வர்ஷங்களுக்கு முன்னர் தோன்றிய ஸ்ரீமத் அப்பய்ய தீக்ஷிதேந்த்ராள் ஸனாதனதர்மத்தையே மீண்டும் நிலைநாட்டினார்கள். அவர்களின் பரமபவித்ரமான வம்சத்தில் ஒன்பதாவது நேர் தலைமுறையில் தோன்றிய மன்னார்குடி பெரியவாள் ஸகல சாஸ்த்ரங்களையும் கற்றறிந்து அத்வைத ஸபையை ஆரம்பித்து வைத்து பல சாஸ்த்ரங்களிலும் நூற்றுக்கணக்கான பண்டிதர்களை உருவாக்கிய மஹான். ராஜமன்னார்குடியில் தான் வலித்த புனித க்ருஹத்தை ஸ்ரீமடத்திற்கு ஸமர்ப்பணம் செய்துள்ளார்கள். அந்த க்ருஹத்தில் ஸ்ரீமடம் பல தார்மிக கார்யங்களைச் செய்து வருகிறது.

ஸ்ரீ மன்னார்குடி பெரியவாளின் பித்ரு மாத்ரு - உபயவம்சத்தைச் சேர்ந்தவர்கள் சேர்ந்து அவரது 195-ஆவது ஜயந்தி மஹோத்ஸவத்தை 02.06.2010-இல் லோகக்ஷேமார்த்தமாக ஹோமம். உபநிஷத்பாராயணம் சாஸ்த்ர வாக்யார்த்தங்கள். உபன்யாஸங்கள் முதலிய பல அம்சங்களுடன் கொண்டாட இருப்பதையும் அதன் அங்கமாக அவர் இயற்றிய த்யாகராஜஸ்தவம் என்னும் நூலில் அடங்கிய ரதோத்ஸவபஞ்சகம் என்னும் நூலை ப்ரஹ்மஸ்ரீ கோடா.வேங்கடேச்வர சாஸ்த்ரிகளால் தமிழ் ஆங்கிலம் இரண்டிலும் சுருக்க உரையுடன் எழுதப்பட்டு வெளியிடப்பட் இருப்பதையும் அறிந்து ஸந்தோஷிக்கிறோம்.

ஸ்ரீமஹாத்ரிபுரஸுந்தர்யம்பா ஸமேத ஸ்ரீ சந்த்ரமௌளீச்வர ஸ்வாமியின் அருளால் ஜயந்தீ உத்ஸவம் சிறப்பாக நடந்து இதில் பங்கு கொள்ளும் அனைவரும் ஸகலச்ரேயஸ்ஸையும் அடய ஆசீர்வதிக்கிறோம்.

நாராயணஸ்மருதி:

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

☎ :044-27222115
Fax: 044 -27224305, 37290060 e: Email: skmkanci@md3.vsnl.net.in.

॥ Sri Chandramouleeswaraya Namaha: ॥
Sri Sankara Bhaghavadpadacharya Paramparagatha Moolamnaya Sarvagnapeeta :
His Holiness Sri Kanchi Kamakoti Peetadhipathi

JAGADGURU SRI SANKARACHARYA SWAMIGAL
Srimatam Samsthanam

No. 1, Salai Street, KANCHIPURAM - 631 502.

19. 5. 2010

शास्त्रवार्धिपारदृश्वनां कृतिं महोज्ज्वलां चम्पकाटवीमहात्मनां सुपुण्यरूपिणाम्।
स्यन्दनोत्सवस्य कीर्तिधायिनीं वितन्वतां चन्द्रमौलिवीक्षणात्सदास्तु मङ्गलं नृणाम्।।

अखण्डदयाविलासविभ्रमविराजिताक्षित्रितयस्य अनुमागम्यस्याप्युमागम्यस्य परमेश्वरस्य समस्तांशसञ्जाताः निखिलशास्त्रार्णवपारगाः श्रीमदप्पय्यदीक्षितेन्द्राः चतुरधिकान् ग्रन्थान् विरचय्य सनातनधर्मं पुनः प्रतिष्ठापयामासुः। तेषां परमपवित्रेऽन्ववायाम्बुधौ राजेव राजमानाः राजुशास्त्रिण इति प्रसिद्धाः जन्मालभन्त। सर्वशास्त्रनिष्णाता इमे अद्वैतसभासमुपक्रमं स्वीयेन सान्निध्येन मण्डयामासुः। शतशः पण्डितान् स्वीयेन प्रचारणेन समुद्भावयन्तः अपरस्सुरगुरुरिव व्यभ्राजन्त। चम्पकारण्ये(राजमन्नार्गुडि) स्वीयं गृहमप्येते अस्मन्मठाय समर्पयामासुरिति एतेषां वादान्यकं नितरामभिनन्दनीयम्। तस्मिन्गृहे इदानीमपि प्रचाल्यमानाः धार्मिककार्यक्रमाः अद्यापि तस्य कीर्तपताकेव राराजते।

चम्पकारण्यमहात्मानः(मन्नार्गुडिपेरियवा) इति सादरं संस्तूयमानानामेषां उभयवंशगताः तेषां पञ्चनवत्यधिकशततमजयन्तीमहोत्सवं लोकक्षेमाय २०१० जूनमासस्य द्वितीयदिनाङ्के होम, उपनिषत्पारायण, शास्त्रवाक्यार्थ, उपन्यासादिकार्यक्रमैः समायोजयन्तीति तत्सन्दर्भे त्यागराजस्तवे अन्तर्भूतां रथोत्सवपञ्चकाख्यां कृतिं ब्रह्मश्रीजुषां गोडेत्युपाधिमतां वेङ्कटेश्वरशास्त्रिणां द्रविडाङ्गिलानुवादेन सहितां प्रकाशयन्तीति ज्ञात्वा नितरां मोमुद्यते चेतो नः।

श्रीमहात्रिपुरसुन्दर्यम्बासमेतश्रीचन्द्रमौलीश्वरकृपया सोऽयं जयन्त्युत्सवः सवैभवो विराजतामिति तस्मिन् भागगृहीतारः समस्तश्रेयोविलासैः समेधन्तामिति चाशास्महे।

नारायणस्मृतिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

ரதோத்ஸவம்

புனித பாரததேசத்திற்குப் பெருமை அளிப்பது வானளாவிய கோபுரங்களுடன் கூடிய திருக்கோயில்களும், புண்யதீர்த்தங்களுமேயாகும். கோபுரதர்சனம் கோடிபுண்யம் என்பார்கள். கோபுரதர்சனத்தால் பாபங்கள் நீங்கி ஸகல ச்ரேயஸ்ஸையும் அடைகிறார்கள். அப்படிப்பட்ட பெருமை வாய்ந்த திருக்கோயில்களில் ஆண்டுதோறும் பத்து நாள் ப்ரஹ்மோத்ஸவம் நடப்பது வழக்கம். ப்ரஹ்மோத்ஸவத்தில் பத்து நாளும் பகவான் ஒவ்வொரு வாஹனத்தில் அமர்ந்து வீதிவலம் வந்து, கோயிலுக்கு வரமுடியாமல் இருப்பவர்களுக்கும் தர்சனம் அளித்து, அவர்களையும் அருள்பாலிப்பது பகவானின் கருணையைக் காட்டுகிறது. பத்து நாள் உத்ஸவத்தில் ரதத்தில் எழுந்தருளி அருள்பாலிப்பதும் ஒன்றாகும். ரதோத்ஸவத்தில் திருவாரூர் ரதோத்ஸவம் மிகச்சிறந்ததாகக் கூறப்படுகிறது. திருவாரூர் தேரழகு, காஞ்சீபுரம் குடையழகு, ஸ்ரீரங்கம் மதிலழகு என்று கூறுவார்கள். திருவாரூர் தேரை ஆழித்தேர் என்று அழைப்பது ப்ரஸித்தமாக உள்ளது. ரதோத்ஸவத்தில் ஏழை, பணக்காரன், உயர்ந்தவன், தாழ்ந்தவன் என்ற வித்யாஸம் இல்லாமல் அனைவரும் ஊர்கூடி தேரிழுத்துப் பகவானுக்கு ஸேவை செய்வதன் மூலம் அஹங்காரம் அழிகிறது. உண்மையான தேசிய ஒருமைப்பாடு ரதோத்ஸவத்தில்தான் ஏற்படுகிறது. மேலும், **ரதோத்ஸவே ஸ்பர்சதோஷோ ந வித்யதே** என்று, தேர்வடத்தை இழுப்பதில் ஒருவருக்கொருவர் மேல் படுவதால் தோஷம் ஏற்படுவதில்லை என்றும் சொல்வார்கள்.

வ்ருஷபவாஹனத்தில், பரமேச்வரன் த்ரிபுரஸம்ஹாரம் செய்யச் செல்லும் ஸமயம் தேரில் சென்றார். அப்போது, பூமியே தேர்த்தட்டாகவும், ஸூர்யசந்த்ராள் இரு சக்ரங்களாகவும், ப்ரஹ்மா ஸாரதியாகவும் இருந்ததாக சைவ புராணங்கள் கூறுகின்-றன.

பொதுவாக, ரதோத்ஸவத்தில் நான்கு வேதங்கள் குதிரைகளாகவும், ப்ரஹ்மா ஸாரதியாகவும் இருந்து ரதோத்ஸவத்தை நடத்துவதாகவும், இத்தகைய உத்ஸவம் சாம்பவீ தீக்ஷையாக அமைந்திருப்பதாகவும் ஆகமங்கள் கூறுகின்றன. கை, கால், கண் முதலிய அங்கஹீனர்களுக்கு பகவான் நேரில் வந்து காக்ஷியளித்து அருள்பாலிப்பதை சாம்பவீ தீக்ஷை என்று சொல்கிறார்கள்.

வடதேசத்தில், பூரி ஜகன்னாத க்ஷேத்ரத்தில், ரதோத்ஸவத்தை மோக்ஷம் அளிக்கும் உத்ஸவமாகக் கொண்டாடுகிறார்கள். ரதசக்ரத்தில் விழுந்து உயிரை விடும் பழக்கம் இருப்பதாகக் கேள்வி. மேலும், அந்த ரதத்தை மஹாராஜா தங்க ஸம்மார்ஜனியால் சுத்தப்படுத்தும் வழக்கமும் தொடர்ந்து நடந்து வருகிறது. இப்படிப் பலவகையில் சிற்பாகக் கொண்டாடப்படும் திருவாரூர் ரதோத்ஸவத்தின் பெருமைகளை மன்னார்குடி பெரியவாள் நமது நன்மைகளையும் க்ஷேமங்களையும் கருதி இயற்றிய நூல், **ரதோத்ஸவ பஞ்சகம்** ஆகும். இந்த நூலை ப்ரஹ்மஸ்ரீ கோடா வேங்கடேச்வர சாஸ்த்ரிகள் தமிழிலும், ஆங்கிலத்திலும் அனுவதித்து பேருபகாரம் புரிந்துள்ளார். இந்த நூலின் உதவியால் பகவானை த்யானம் செய்தும், ரதோத்ஸவங்களில் கலந்து கொண்டு தேர்வடமிழுத்தும், பகவத் கைங்கர்யம் செய்தும் பிறவிப்பயனை அடைவோமாக.

பூஜ்யஸ்ரீ மன்னார்குடி பெரியவாள் அவர்களின் விதேய பக்த சிஷ்யர்களில்
ஒருவன் - அடையபலம் ராமகிருஷ்ண தீக்ஷிதர்

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

Introduction

Tyagesa Rathotsava Pancaratnam is one of the masterpieces of Mahamahopadhyaya Brahmashri Mannargudi Thyagraja Makhi. He is referred only as Mannargudi Periyaval, by one and all. As a mark of esteemed respect, his original name was never used.

Shri Sastrigal (Shri Mannargudi Thyagaraja Makhi) was born in the year Yuva, 28th May 1815, in a village called, Kuttambadi, next to Tiruvarur (Kamalālaya Kshetra), in Tanjore district. He was the ninth descendant of the great Appayya Dikshitar of Adayapalam, who is considered as an incarnation of Lord Siva. His father was Margasahāya Appa Dikshitar (Appayya Diskshitar) and mother, Smt. Marakathavalli alias Janaki. Appa Dikshitar was a great scholar in grammar and Dharma Sastra. Shri Sastrigal was given the sacred thread ceremony at his seventh year. From then onwards, for five years he learnt Sama Veda from his grandfather, including the Upanishad, Brahmana, Gautama Dharma Sutras etc. Later he was trained in Kavyas and Natakās by his own father. Later Sri Sastrigal went to Kumbakonam and learnt Mahabhashya of Patanjali from Chinnanna Sastrigal and Purva Mimamsa from Sri Raghunatha Sastrigal. He was trained in modern logic by Narayanendra Saraswathi. He learnt Vedanta from Svayamprakasa Swamigal. At the young age of twenty Sri Sastrigal became famous as a great pundit.

In the year 1836, Shri Sastrigal was invited to the Navarathri Sadas at Pudukkottai, in which his glory outshone that of every other great pundits. Many disciples started coming to learn from him. Some of his disciples who later became famous include Painganadu Ganapathi Sastrigal, Tirukoshtiyur Harihara Sastrigal, his own grandson Yagnaswami Sastrigal, Parithiyur Krishna Sastrigal, Sacchidananda Swamigal.

Shri Sastrigal performed Somayaga in the year 1874. Shri Sastrigal was awarded the title **Mahamahopadhyaya** in the year 1887 by Queen Victoria, in connection with the golden jubilee celebrations of her coronation. Shri Sastrigal presided over the Advaita Sabha at Kumbakonam, which was started by H.H. Chandrasekharendra Saraswathi Swamigal, the 66th pontiff of

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

Kanchi Kamakoti Peetam. He presided over the sadas sessions for seven consecutive years and guided many pundits. His love for Sastras, concern for the disciples and discipline in performing various rites, including daily visit to the temples, were unparalleled. Almost all the pundits in India belong to his lineage of disciples.

His works, numbering thirty, include **Sadvidya Vilasa, Nyayendu Sekhara, Sama Rudra Samhita Bhasyam, Siva Tattva Viveka Dipika, Thyagaraja Stava.** Many litanies were penned by him, which include **Siva Mahimna Kalika Stuti, and Thyagesa Rathotsava Pancharathnam.** Though his works are in simple language, they are very profound in meaning. All the Sastras are referred in them. Really, they are fertile ground for research. A reader will find that in these five verses describing the Rathotsava - car festival at Tiruvarur, many nuances of Sastra were used by Sri Sastrigal.

An attempt is made to transliterate and translate the works of Shri Sastrigal in English and Tamil, so that the modern youth will have an access to this vast treasure house of knowledge. For the sake of easy reading, the translation of the verse and translation of commentary in simple language is given. For those, who are interested in research, the grammatical peculiarities, Mimamsa Nyayas and Vedantic references are given separately, as special notes, so that maximum justice is done to the commentary of Sri Sastrigal.

I thank all those who had helped directly or indi-rectly in the preparation of this small work. Special thanks to Shri P.N.Sundaresan who had typeset the Sanskrit version of the slokas and commentary and arranged the page-making etc. My sincere thanks are for the Mannargudi Periava Seva Samithi for undertaking the publication. May the Lord be pleased and shower His Grace so that all the works of Shri Sastrigal will be published soon with English and Tamil meanings, so that the world can get benefit of the immense knowledge of Shri Sastrigal.

Chennai **Dr.Goda Venkateswara Sastri**

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

॥ श्रीः ॥

अथ श्रीत्यागेश महारथोत्सववर्णनपरश्लोकपञ्चरत्नम्

दूरेत्या अपि कूपखानकनयाद्धूमानसो रोहणे
सोढ्वा दोषमनेन शीघ्रमुपसम्प्राप्य स्थलं पावनम्।
नादर्शन्निह ये रथोत्सवमुमानाथस्य लक्ष्मीपुरे
चक्षुष्मत्सु जना न कार्यगणनास्ते तत्फलालाभतः॥ १॥

दूरेत्या इति॥ ये जनाः दूरेत्या अपि सन्तः इतो योजनशतप्राप्य-विप्रकृष्टदेशस्थितत्वेन धूमशकटारोहणं विना शीघ्रमागन्तुमसमर्था अपीत्यर्थः। **दूरादेत्यः** इति दूरशब्दादेत्यप्रत्ययः। धूमानसः धूमशकटस्य रोहणे दोषं नीचाशुचि-सम्पर्कादिरूपं सोढ्वाभ्युपगम्य, अनेन शीघ्रं पावनं स्थलं स्वप्रवेशमात्रेण सकलपातक-निवर्तकं कमलालयस्थलम् उपसम्प्राप्य इह लक्ष्मीपुरे प्रवर्तमानमिति शेषः। उमा-नाथस्य सोमास्कन्दत्यागेशस्य रथोत्सवं नादर्शन् न दृष्टवन्तः। **दृशिर् प्रेक्षण** इत्यस्मा-द्धातोर्लुङि **इरितो वा** इति च्लेरङि **ऋदृशोऽङि गुणम्** इति गुणः। ते जनाः लोचनवत्सु कर्तव्यगणना न भवन्ति कर्णान्तविश्रान्तलोचनानामपि तेषमीदृशोत्सवदर्शनरूपफला-नवाप्त्या प्राशस्त्यरूपमतुवर्थबाधेन चक्षुष्मत्वेन गणनं न कर्तुमर्हमिति भावः। ननु तथापि **प्रक्षालनाद्धिपङ्कस्य दूरादस्पर्शनं** वरमिति न्यायादुक्तदोषाभ्युपगमेन प्रवृत्ति-रयुक्तैवेत्याशङ्कायामाह - कूपखानकनयादिति। **प्रक्षालनाद्धि** इति न्यायस्यापवादभूतः कूपखानकन्यायः। अयञ्च महाभाष्ये पस्पशाह्निके दर्शितः। तत्र हि सुशब्दज्ञानाद्धर्म इत्यभ्युपगमे तदर्थमपशब्दानामपि ज्ञानावश्यम्भावेन तज्ज्ञानादधर्मोऽपि स्यादित्या-शङ्क्याऽनेकधा परिहारमुक्त्वाऽयं न्यायो दर्शितः - "कूपखानकवदेतद्भविष्यति, तद्यथा-

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

|| śrīḥ ||

atha śrī tyāgeśamahārathotsavavarṇanapara sloka pañcaratnam

dūretyā api kūpakhānakanayād-
dhūmānaso rohaṇe
soḍhvā doṣamanena śīghramupasamprāpya
sthalaṁ pāvanam|
nādarśanniha ye rathotsavamumā-
nāthasya lakṣmīpure
cakṣuṣmatsu janā na kāryagaṇanā-
ste tatphalālābhataḥ | 1

Those who live very far but come by train, accepting the sin of travel by train, as portrayed in the kupakhanaka nyaya, reach this sacred place quickly. Yet if they did not see the car festival of Lord Siva at this Lakshmipura, they are not to be counted upon as persons with eyes, as they did not have the fruit of the same.

There are persons who come to see the rathotsava, even from far away places, 100 miles away. They cannot walk all the distance. Hence, they travel by train, knowing fully well that traveling by train will attract moving with (unclean) [redacted] people and in unhygienic conditions. That defect will be compensated by reaching the holy place Lakshmipura (Thiruvarur). Hence, they are prepared for it. This is similar to the famous koopakhanaka nyaya. A person starts digging a well knowing pretty well that while digging the earth he will be tainted with mud, filth and gravel etc. But all these can be removed and he himself will be made pure once water comes in the well and he bathes in it. However, if those persons who came by train to this place but could not see the car festival for some reason or other; then they lose the purpose of having eyes. One should think that why should they undertake the journey, get the impurity and then remove the

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

कूपखानकः कूपं खनन् यद्यपि मृदा पांसुभिश्चावकीर्णो भवति, सोऽप्सु सञ्जातासु तत एव तं गुणमासादयति येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवति, एवमिहापि यद्यप्यपशब्दज्ञाने अधर्मः, तथापि यस्त्वसौ शब्दज्ञाने धर्मः तेन स च दोषो निर्घातिष्यते भूयसा चाभ्युदयेन योगो भविष्यति" इति॥ १॥

पुरा चापो भूत्वा पुरहरकराब्जोदरमगाम्
भुजङ्गेन्द्राकृष्टः कुटिल इति मेऽथापि गुणिनः।
प्रथासीदातस्तच्चरणनलिनं न्यस्य हृदये
श्रुतो धन्यःस्यामित्यजनि कनकाद्रिःशिवरथः॥ २॥

पुरेति॥ अहं पुरा त्रिपुरसंहारसमये धनुर्भूत्वा परमेश्वरकराम्बुजमध्यं प्राप्तवानस्मि, अथापि महापुरुषपरिग्रहे सत्यपीत्यर्थः। गुणिनोऽपि श्लाघ्यगुणवतोऽपि ज्यायुक्तस्यापीत्यर्थः। अपीत्यस्यावृत्त्या गुणिन इत्यत्रापि सम्बन्धात्। मे मम भुजङ्गेन्द्राकृष्टः मौर्वीभूतेन भुजङ्गराजेनाकृष्टः विटसार्वभौमेन परतन्त्रीकृत इत्यपि प्रतीयते। अत एव कुटिलो वक्रीभूतो वक्रस्वभाव इत्यप्यर्थः। इति प्रथा प्रसिद्धिरासीत्। अत एवंविधदुष्प्रसिद्धिपरिहाराय तस्य चरणनलिनं पुरहरस्य पदाम्बुजं मम हृदय् न्यस्य निधाय धन्यः कृतकृत्यः श्रुतः तथा प्रसिद्धश्च स्यां भवेयमिति आलोचयन् कनकाद्रिः महामेरुः शिवरथः त्यागेशस्यन्दनोऽजनि जात इत्युत्प्रेक्षा। **नश्यद्राजविरोधीति क्षीणं चन्द्रोदये तमः** इत्यत्र बोधयदित्यस्य गम्यमानत्वादप्रयोग इति यथाङ्गीक्रियते, तथा अत्रालोचयन्नित्यस्येति बोध्यम्॥ २॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

same by seeing the Lord. Instead they can remain at their own places. To remove this doubt the above maxim is told. The koopakhanaka nyaya (digging well maxim) is an exception to the above nyaya which has been well explained in Mahabhashya.

purā cāpo bhūtvā purahara-
karābjodaramagām
bhujaṅgendrākṛṣṭaḥ kuṭila iti
me'thāpi guṇinaḥ।
Prathāsīdātastaccaraṇanalinaṁ
nyasya hṛdaye
śruto dhanyaḥsyāmityajani
kanakādriśśivarathaḥ। 2

"Once I as a bow, reached the lotus hands of Lord Siva, was drawn by the king of serpents and so had the bad name as 'the crooked one.' Even great people believed the same. I will now become blessed by holding both His feet in my heart" – thinking so, the great golden mountain (Meru) became the car.

The Meru mountain thinks that, 'Once, at the time of killing the Tripura Asura, I became a bow in the hands of Lord Siva. Lord Siva possessed of all great qualities, had the serpent king Takshaka as the string for this bow. The string was tied to me, the bow, and was drawn out to shoot an arrow. Since I was connected with a serpent, people started adducing me name, as 'a crooked one'. To ward off this bad name, I shall become the ratha – a car and hold both the feet of Lord Siva in my heart'. Thinking this way, Meru, the mountain full of gold, had taken the form of the car of Thyagesa. Thus, the poet fancies.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

भूमानन्दतनोर्महेश! भवतो धामत्मकत्वादिव
श्रीमानेष रथः स्वयं भवति ते प्रेमास्पदं प्राणिनाम्।
भौमानामविशेषतो रुचिभिदां सामान्यतस्तन्वतां
सामाथर्वणऋग्यजुर्मयहयः सोमागुहेश प्रभो ॥ ३॥

भूमेति॥ हे महेश सोमास्कन्देश्वर प्रभो! सामवेदादिरूपदिव्याश्चचतुष्टयोपेतः अत एव सा हि श्रीरमृता सताम् इति श्रुतिप्रसिद्धश्रीमान् सर्वसम्पत्समृद्धिमत्तया विचित्र-रचनविशेषवत्तया शोभावत्तया वा श्रीमान् श्रीर्वेदरचनाशोभासम्पासुरलशाखिषु इति रत्नमालावचनात्। एषः परिदृश्यमानः ते तव रथः भौमानां भूमौ भवानां प्राणिनां मनु-ष्याणामिति यावत्। अविशेषतः विशेषणं विना कतिपयमनुष्यव्यावर्तकविशेषणरहि-तानां सर्वेषां मनुष्याणामिति फलितोऽर्थः। स्वयमत्मनैव प्रेमास्पदं प्रीतिगोचरो भवति स्वयं पुरुषार्थभूतसुखवत् इतरेच्छानधीनेच्छाविषयत्वरूपनिरुपधिकप्रेमास्पदत्वभाक् भवतीत्यर्थः। ननु सर्वेषां जनानां प्रीतिविषयत्वमत्रेण कोऽस्य विशेषः वस्त्वन्तरेऽपि तत्सम्भवदित्यतो भौमन्विशिनष्टि - रुचिभिदामिति। सामान्यतः सामान्याकारेण वस्तुत्वादिना विशिष्टेषु सर्वेषु वस्तुषु रुचिभिदां रुचिभेदं, **षिद्भिदादिभ्योऽङ्** इत्यङ्प्रत्ययः। भिन्नभिन्नां रुचिं तन्वतां विस्तरयतामित्यर्थः। रमणीयवस्तुष्वपि क्वचित् कस्यचित् रुचिः कस्यचिन्नेति लोकसिद्धं, मधुराम्लादिरसविशेषेषु तथा दर्शनात् **लोको भिन्नरुचिः** इति प्रसिद्धेश्चेति भावः। तादृक्प्रेमास्पदत्वे हेतुरुत्प्रेक्ष्यते - भूमानन्दतनोः **यो वै भूमा तत्सुखं नाल्पे सुखमस्ति** इति श्रुतिप्रसिद्धो यो भूमानन्दः अपरिमितसुखं स तनुः स्वरूपं यस्य तस्य भवतः धामात्मकत्वात् स्थानरूपत्वादिवेति भगवतः स्थाने हि कैलासे दुःखासम्भिन्नसुखविशेषवाचिस्वर्गशब्दस्य **देवा ह वै स्वर्गं लोकमगमन्**

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

bhūmānandatanormaheśa! bhavato
dhāmatmakatvādiva
śrīmāneṣa rathaḥ svayaṁ bhavati te
premāspadaṁ prāṇināṁ।
bhaumānāmaviśeṣato rucibhidāṁ
sāmānyatastanvatāṁ
Sāmātharvaṇaṛgyajurmayahayaḥ-
somāguheśa prabho । 3

Oh Mahesha, of infinite blissful body! This great car, like the abode of yours (Kailasa), is an object of liking for all beings. Oh! Somaguhesa Lord, though people in this world have different tastes, unanimously like your chariot tied with four horses viz., Rg, Yajur, Sama and Atharva Vedas.

Oh Lord Soma Guhesa! This grand car steals the hearts of all the people in the region, like your abode (Kailasa).

Normally in this world many people have different tastes. Not everyone will like the same object even though it may be good. But this car is liked by everyone unanimously since it is by itself the goal - i.e., happiness.

This car has four horses representing four Vedas. You are also infinite bliss. The name Mahesa represents that the Lord is above the triad Brahma, Vishnu and Iswara. Soma Guhesa is the twenty first form, as enumerated in the Vatula Suddha Agama and is in the twenty fifth Tattwa.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

इत्याद्यार्थर्वणोपनिषदि प्रयोगात् तादृक्प्रियत्वं सम्प्रतिपन्नमिति भावः। गृहदेह-त्विट्प्रभावा धामानि इत्यमरः। महेशेति विशेषणं सोमास्कन्दमूर्तेः त्रिमूर्त्युत्तीर्णमहेश्वरमूर्तिषु पञ्चविंशतावन्तर्भावं सूचयितुम्। सा हि विघ्नप्रसादं विंशं च सोमास्कन्दमतः परम् इति वातुलशुद्धवचनात् तस्यैकविंशतितमी मूर्तिः॥ ३॥

कनकरत्नसिंहासनश्रीपरिवेषादिष्विव भगवन्मूर्त्यभेदाध्यासाद्वा महारथे तादृक्प्रियत्वं जनानामित्याह –

अध्याससिद्धयदभेदवशेन देहम्
अत्यन्तहेयमिदमप्यधिकप्रियं नः।
वस्तुस्वभावरुचिरं यदि तेन किञ्चि-
दध्यासितं तदिह कस्य न हि प्रियं स्यात्॥ ४॥

अध्यासेति॥ अत्यन्तहेयं सर्वाशुचिनिधानत्वादिना सुतरां हातुं योग्यमिदं शरीरमपि नः अस्माकमधिकप्रेमविषयो भवतीति शेषः। तत्र हेतुः अध्याससिद्धः भ्रमसिद्धः यदभेदः यस्य तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात्, आत्मनस्तु कामाय सर्वं प्रियं भवति इत्यादिश्रुतिसिद्धनिरतिशयप्रीत्यास्पदस्यात्मनः तादात्म्यं तद्वशेन आनन्दात्मकात्मै-क्याध्यासादेव हेयेऽपि देहादौ प्रीतिविषयत्वमिति वेदान्तमर्यादा। एवं स्थिते स्वभाव-रुचिरं निसर्गसुन्दरं किञ्चिद्वस्तु रथादिकं तेनात्मना भवता यदध्यासितं तद्वस्तु इह लोके कस्य हि प्रियं न स्यात्? तस्य सर्वप्रियत्वं कैमुतिकन्यायसिद्धमिति भावः। तेनाध्यासि-तमित्यत्र भवद्रूपप्रकारकाध्यासविषयीकृतमित्यर्थे विवक्षिते अध्यास्यतेर्णिजन्तात् अविवक्षितणिजर्थात् कर्मणिक्तप्रत्यये सत्यध्यसितमिति रूपसिद्धिरध्यस्तमित्यर्थलाभ-श्चेति बोध्यम्। आस उपवेशन इत्यस्मात् अधिपूर्वात् क्तप्रत्यये वा रूपम्। धातूना-मनेकार्थत्वादध्यस्तमित्यर्थलाभः॥ ४॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

adhyāsasiddhayadabhedavaśena deham
atyantaheyamidamapyadhikapriyaṁ naḥ।
vastusvabhāvaruciraṁ yadi tena kiñci-
dadhyāsitaṁ tadiha kasya na hi priyaṁ syāt।

This body, though fit to be totally abandoned, is very much liked by us as it is identified (with ourselves) by superimposition.
This object (car) by nature is beautiful and is also boarded by you. Hence, to whom will this be an object of dislike?

This gross body is full of impurities and should be discarded by everyone. But it is liked by everyone. This is due to the superimposition of the Self over it. This inner Self is dearer than son, dearer than money and dearer than anything in this world.

However, this car is, by nature, beautiful. Furthermore, you are boarded on it. Hence, there is no wonder that everybody loves to view the same.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,

आकर्षोद्योगमात्रेऽप्यतिविरलनृणां द्रावयत्याशुगस्तान्
भूयोभिर्भूरियत्नैर्भुवि मनुजगणैः कम्प्यते नो कथञ्चित्।
त्यागेश! त्वद्रथोऽयं प्रथयति च ततः पारतन्त्र्यं परेषां
स्वातन्त्र्यं च स्वतस्ते श्रुतिशतविदितं लौकिकानां
गरीयान्॥ ५॥

आकर्षेति।। हे त्यागेश! गरीयान् गुरुतरः महाशिलासङ्घातकठिनाभिरतिस्थूलाभिरतिदीर्घाभिश्चायसश्शृङ्खलातुलिताभिरनेकाभीरज्जुभिः अनेकसहस्रसङ्ख्याकबलाधिकपुरुषैराकर्षणीयत्वत्। गुरुशब्दादीयसुन्प्रत्यये प्रियस्थिर इत्यादिना तस्य गरादेशः। अयं त्वदीयरथः अतिविरलानां प्रतिरज्जु विरलविरलतया क्वचित्क्वचित् स्थित्वा रज्जुस्पर्शमात्रं कुर्वतां नृणां कतिपयपुरुषाणामाकर्षोद्योगमात्रे आकर्षणार्थोद्यममात्रे सत्यपि, मात्राशब्देन दृष्टकारणान्तरव्यवच्छेदः। स्वयमाशुगः शीघ्रमागच्छन् सन् तानाकर्षकपुरुषान् भुवि रथ्यायां द्रावयति धावयति, यथा ते धावन्ति तथा शीघ्रमागच्छतीत्यर्थः। कदाचित्तु भूरियत्नैः बहुविधप्रयत्नैः भूयोभिर्बहुतरैः मनुजगणैः प्रतिरज्जु आदित आरभ्यान्तं व्याप्य निरन्तरालतया स्थितैः सर्वविधदृष्टसाधनसहितैः बलीयोभिः पुरुषसङ्घैरपीत्यर्थः। कथञ्चित् महता प्रयासेनापीत्यर्थः। नो कम्प्यते न चाल्यते किञ्चिच्चलनमपि न प्राप्नोतीत्यर्थः। ततश्च श्रुतिशतविदितं सत्यकामः सत्यसङ्कल्पः इत्याद्यनेकवेदवाक्यावगतं ते स्वातन्त्र्यमवन्ध्यसङ्कल्पत्वं परेषां त्वदन्येषां जीवानां ज्ञाज्ञौ द्वावजानीशनीशौ, अज्ञो जन्तुरनीशोऽयम् इत्यादिश्रुतिस्मृत्यवगतं पारतन्त्र्यं च लौकिकानां जनानामनधिगतवेदार्थानामपीत्यर्थः। स्वतः स्वरूपेण प्रथयति प्रख्यापयतीत्यर्थः। अज्ञानामपि भगवत्स्वातन्त्र्यादिकं रथोऽयमनुमापयति, कार्यादिति भावः। एवंविधवेदरहस्यार्थोपदेशित्वादपि गरीयान् अतिशयितो गुरुरयमित्यर्थान्तरं बोध्यम्॥ ५॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jaigad

ākarṣodyogamātre'pyativiralanṛṇāṁ
drāvayatyāśugastān
bhūyobhirbhūriyatnairbhuvi manujagaṇaiḥ
kampyate no kathañcit|
tyāgeśa! tvadratho'yaṁ prathayati ca tataḥ
pāratantryaṁ pareṣāṁ
svātantryaṁ ca svataste śrutiśataviditaṁ
laukikānāṁ garīyān || 5 ||

Oh Tyegesa! This your car sometimes makes the pullers run quickly, even by a little effort by few persons. At other times it does not move even a bit in spite of the great efforts made by many groups of men. Thus this great car of yours shows what is taught in many Sruti texts, that only you are independent while others are dependent on you.

This car of yours is mighty, since it is made up strong rocks, thick planks, long iron rods and thousands of nails etc. It is drawn by thousands of strong men, with great effort. Sometimes this car is being drawn by few persons only, that too they merely touch the rope and do not put much effort. Still, the car runs and makes them move forward quickly. However, at some other time, even though it is drawn by a huge band of strong men with full effort, it doesn't move a bit. This only shows to even ordinary people, that Your Will alone shall prevail and all others in this world are dependent on you, as is taught in many Vedic texts.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation

ஸ்ரீ:

அத ஸ்ரீ த்யாகேசமஹாரதோத்ஸவவர்ணனபர பஞ்சரத்னம்

தூரேத்யா அபி கூபகானகநயாத்தூமானஸோ ரோஹணே
ஸோட்வா தோஷமனேன சீக்ரமுபஸம்ப்ராப்ய ஸ்தலம் பாவனம்.
நாதர்சன்னிஹ யே ரதோத்ஸவமுமாநாதஸ்ய லக்ஷ்மீபுரே
சக்ஷுஷ்மத்ஸு ஜனா ந கார்யகணனாஸ்தே தத்பலாலாபத:1

ரயில் வண்டி ஏறி, அதனால் வரும் தோஷங்களையும் ஸஹித்துக் கொண்டு, தங்களுடைய ரதோத்ஸவத்தைக் காண வெகு தூரத்திலிருந்து வருகின்றார்கள். புனிதமான இந்த லக்ஷ்மீபுரத்தை அடைந்ததுமே எல்லா பாபங்களும் அகன்று விடும். ஆனால், அப்படி வந்தும் ரதோத்ஸவத்தைப் பாராதவர்களுக்கு அப்பலன் கிடைக்காததனால், அவர்கள் கண்கள் உடையவர்களாக கணக்கிடப்படமாட்டார்கள்.

புரா சாபோ பூத்வா புரஹரகராப்ஜோதரமகாம்
புஜங்கேந்த்ராக்ருஷ்ட: குடில இதி மேதாபி குணின:.
ப்ரதாஸீதாதஸ்தச்சரணநலினம் ந்யஸ்ய ஹ்ருதயே
சருதோ தன்யஸ்ஸ்யாமித்யஜனி கனகாத்ரிச்சிவரத: 2

"ஒரு காலத்தில், பரமேச்வரன் த்ரிபுர ஸம்ஹாரம் செய்யும் தருணத்தில், நான் வில்லாக ஆகி பரமனின் கைத்தாமரைகளை அடைந்தேன். குணவானான பரமேச்வரனும் அவ்வில்லில், பாம்புகளின் அரசனான தட்சகனை நாணாகக் கட்டினார். அந்த பாம்பின் ஸம்பந்தத்தால் எனக்கும் குடிலன் என்று அவதூறு ஏற்பட்டது. அதை நீக்கிக்கொள்ள பரமனின் திருவடிகளை எனது இதயத்தில் தரிப்பேன்," என மேருமலைக் கருதி, இந்த ரதமாக ஆகிவிட்டதல்லவா!

பூமானந்ததனோர்மஹேச! பவதோ தாமாத்மகத்வாதிவ
ஸ்ரீமானேஷ ரத: ஸ்வயம் பவதி தே ப்ரேமாஸ்பதம் ப்ராணினாம்.
பௌமானாமவிசேஷதோ ருசிபிதாம் ஸாமான்யதஸ்-
தன்வதாம்
ஸாமாதர்வணருக்யஜுர்மயஹயஸ்ஸோமாகுஹேஷ ப்ரபோ

3

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Gujar

பூமானந்த வடிவமான மஹேச்வரரே! மிகச் சிறந்த இந்தத் தேர், துக்கக் கலப்பற்ற, ஸந்தோஷ வடிவமான கயிலையைப் போல், எல்லா ப்ராணிகளாலும் விரும்பப்படுகிறது. இவ்வுலகில், மனிதர்கள் வெவ்வேறு ஆசைகள் உள்ளவர்களாக இருப்பார்கள். ஆயினும், இந்தத் தேர் எல்லோருடைய மனதையும் ஒருசேரக் கவருகிறது. ஓ ஸோமாஸ்கந்தமூர்த்தியே! தங்களுடைய தேரில், நான்கு குதிரைகள் நான்கு வேதங்களாக அமைந்துள்ளன.

அத்யாஸஸித்தயதபேதவசேன தேஹம்
அத்யந்தஹேயமிதமப்யதிகப்ரியம் நः.
வஸ்துஸ்வபாவருசிரம் யதி தேன கிஞ்சி-
தத்யாஸிதம் ததிஹ கஸ்ய ந ஹி ப்ரியம் ஸ்யாத் 4

எல்லோராலும், எப்போதும் தள்ளத் தகுந்த இந்த பூத உடல் அத்யாஸத்தினால் ஆத்மாவாகக் பார்க்கப்பட்டு மிகவும் ப்ரியமாக கருதப்படுகிறது. தங்கள் ரதமோ ஸ்வபாவமாகவே மிகவும் அழகாக உள்ளது. அத்துடன் அதன் மேல் தாங்களும் விற்றிருக்கின்றீர்கள். இப்படிப்பட்ட ரதமானது யாருக்குத்தான் ப்ரியமாகாது!

ஆகர்ஷோத்யோகமாத்ரேப்யதிவிரலந்ருணாம்
த்ராவயத்யாசுகஸ்தான்
பூயோர்பூரியத்னைர்புவி மனுஜகணை
கம்ப்யதே நோ கதஞ்சித்
த்யாகேச த்வத்ரதோயம் ப்ரதயதி ச தத
பாரதந்த்ர்யம் பரேஷாம்
ஸ்வாதந்த்ர்யம் ச ஸ்வதஸ்தே ச்ருதிசதவிதிதம் 5

சில ஸமயம், சில பேர்களுடைய சிறு முயற்சியாலேயே இந்த ரதம் வேகமாகச் செல்வதால், அவர்களையும் விரைவாகச் செல்லத் தூண்டுகின்றது. சில ஸமயங்களில் மிக அதிகமான ஜனங்கள் பெருமுயற்சியுடன் செயல்பட்டாலும், அசையாமலே நிற்கிறது. ஓ த்யாகேசரே! இவ்வுலகில் எல்லா விஷயத்திலும் ஸ்வாதந்த்ர்யம் தங்களுக்கே. மற்ற எல்லோரும் பரதந்த்ரர்களே, என்று வேதங்கள் ஓதியுள்ள தத்துவத்தை இந்த ரதம் மிகச் சிறப்பாகக் காட்டுகிறது. இ:ந்து மிகவும் ஆச்சரியம்!

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

Special Notes

Verse I

1. **Duretyā** : This word is got by adding **etya** suffix to the root **dura** by the sutra **durādetyah.**

2. **Adarsan** : This form is got from the root **drisir-prekshane** (to see) in the aorist. The suffix **chli** is added to it, which is transformed to **ang** by the sutra **irito vā** (3.1.57). The guna is got by the sutra **rudriso adeng gunah** (7.4.16).

3. The maxim **prakshālanāddhi pankasya durāt asparsanam varam** is referred here. This means that, it is better to be away from the mud than to walk in it and then clean the feet later. There is another maxim which is an exception to the above maxim and it is called **kupakhānaka nyāya.** This says that one who digs a well gets attached with mud, dust and other things in the beginning, but all of them are cleansed once water is got in the well. He also gets much more benefits from the water in the well. This maxim is quoted in the Mahabhasya for a doubt that if one is to get virtue by the knowledge of proper words, then one has to know many impro-per words too to distinguish the proper word from many improper words and thereby one may attract sins also. The answer is given as, 'If one is to get a sin by knowing improper words, then by knowing the proper word he gets not only virtue which removes the sin but also much more welfare'.

Verse 2

The word **ālochayan** (thinking so) is missing in the verse. This is acceptable in the parlance of poets (poetic license). There is usage **nasyat rājavirodhīti kshīnam chandrodaye tamah** (The enemy of the king will be destroyed, so darkness went away when moon arose). Here also the word 'thinking so' should be understood.

Verse 3

1. The chariot is **srimān** - filled with welfare, since it is drawn by horses of Vedas like Sama Veda. Vedas alone is the real asset of great as per the Sruti text **sā hi śriramrutā satām.** It is also beautiful because of its artistic making and grace.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

2. **ruchibhidām** : This word is formed by adding the suffix **ang** to the root **ruchi** by the sutra **shidbhidadibhyo ang** (3.3.104).

3. **loko bhinna ruchih** – The tastes of people differ vastly.

4. **Yo vai bhumā tat sukham, nālpe sukhamasti** (Ch.Up.VII-23). 'That which indeed is the Infinite; that is joy. There is no joy in the finite'.

5. Happiness is enjoyed in the heavens and Kailasa is known by the Atharvana Upanashid **devā ha vai svarga lokam agaman** (Gods indeed went to the heavens for happiness).

6. The form of Somaskanda is the twenty-first form among the various forms enumerated in the Vatula Suddhatantra. This form is one among the twentyfive forms that transcend the triad of gods.

Verse 4

1. The atman is loved most by everyone according to the sruti texts: **tadetat preyah putrāt preyo vittāt** (Brih.Up.I.4.8); (This is more liked than the son, than money); **ātmanastu kāmāya sarvam priyam bhavati** (Brih Up. II.4.5) (Every thing is loved for ones own sake).

2. The word **adhyāsitam** is got by adding the suffix **kta,** to the root **āsa upavesane** and with a prefix **adhi**.

Verse 5

1. The word **garīyān** is formed by adding the suffix **īyasun,** to the word guru by the sutra **priya sthira.....** (6.4.157).

2. Independence of Lord is known by the Sruti text **satyakāmah satyasamkalpah** (Ch.Up.VIII.7.3) (He has no unfailing desire and unfailing will). Depen-dence of Jiva is known by the Sruti texts **gyāgyau dvavajāvīsanīsau** (Svet.Up.I.9.) (There are two persons one jiva who is ignorant and dependant whereas Iswara is all-knowing and independent); and **agyo janturaniso'yam** (This being is dependent and ignorant).

OM

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

॥ श्रीः ॥

॥ अथ अर्धनारीश्वरस्तवः ॥

देवोऽर्धनारीनररूपधारी पायादपायादनपायशक्तिः ।
कालश्रिया कर्शितनीलरत्नप्रवालकान्तिप्रवरः प्रभुर्नः ॥ १ ॥

यन्मूर्तिस्फूर्तिभाजामपि निखिलविदां तन्महिम्ना बुधानां
जातित्वेनाभिधातुं न समुचितमिति स्त्रीपुंस्त्वाख्यधर्मौ ।
निर्वक्तुं संयतन्ते कतिचन कतिचित्संकरादोषतोक्त्यै
मूर्तिस्सा दिव्ययूनोर्मुहुरतिरुचिरा योचयेत्संकटान्नः ॥ २ ॥

दक्षिणवीक्षणपातक्षणधृतसंकोचवामनयनाब्जम् ।
एणाङ्कखण्डचूडं स्त्रैणार्द्धतनुं वृणीमहे तरुणम् ॥ ३ ॥

कमपि पुरुषमाद्यं कामिनीविग्रहार्धं
कमलनयनमुख्यैः कान्तसख्यैकपार्श्वम् ।
कलितसुषमवामं काम्यरूपाप्सरोभिः
कवलितविषराजं कालकालं भजामः ॥ ४ ॥

नाथस्यार्धवधूनरात्मवपुषः पादादि शावधि
स्तुत्यं सर्वसुपर्वभिः किमपि तद्भाभातु मन्मानसे ।
दिव्यं रूपमपास्तसाम्यमखिलाश्चर्यं विचिन्त्यं सतां
धन्योऽहं भवितास्मि येन सकलैः श्लाघ्यः सुधास्वादिभिः ॥ ५ ॥

स्त्रैणं रूपमुपास्यते गिरिश! ये पौंस्नं लभन्ते न ते
न स्त्रैणं च तथापरे तदुभयं यत्रैक्यतः साद्यथा ।
ह्यस्येकामुभयात्मिकां किमतनोस्तारुण्यभूमां तनुं
दम्पत्योः सहभूः कदापि कलहो माभूदितीच्छन् किमु ॥ ६ ॥

अस्तवे आद्यद्वितीयश्लोकौ त्यागराजस्तवान्तर्गतौ (१०, ११) द्रष्टव्यौ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao

धराधराधिराजभूपुराभिरामविग्रहः
चराचरान्तरस्थितः सुरासुराभिवन्दितः ।
निराकृतस्मरामयः स राजराजसंस्तुतः
पुरामरातिराविरस्तु नः पुरः पुरातनः ॥ ७ ॥

वाराशिजादयितनारायणाभिनुत दारार्धशोभिततनो
स्वाराज्यपुत्रधनवैराग्यबोधसुखसारात्मलाभजनिभूः ।
धाराधराभगल पारायणप्रवणपौराणिकेड्यमहिमन्
घोरापदं शमय मे राजराजसख वाराणशीपुरपते ॥ ८ ॥

इति श्रीत्यागराजमखिकृतिषु अर्धनारीश्वराष्टकं संपूर्णम् ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja



With

Pranams

Ramamurthi & Family
MUMBAI

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgao



श्रीपुरे विराजमाना श्रीत्यागराजमूर्तिः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

zed by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Ja

|| Sahasra Seersha Purusho
Venkatesassirovatu
Pranesha Prananilayaha
Pranan rakshatu mey Harihi ||

|| Let my head be protected by,
Lord Venkatesa with thousand aspects,
Who is the lord of all souls,
And place where the soul merges. ||



TIRUPATI
BHIMAS
A TRADITION OF HOSPITALITY

Thirupathi Bhimas Spice & Foods

48/1, Reddy & Reddy Colony, Tirupati – 517 501 e-mail: info@bhimasspiceandfoods.com www.thirupathibhimasspiceandfoods.com

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry